National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 149-151
© 2026 NJHSR
www.sanskritarticle.com

**अनिलकुमारशुक्लः**
शोधच्छात्रः, साहित्यविभागः,
गंगानाथझापरिसरः, प्रयागराजः
.

**Correspondence:**
**अनिलकुमारशुक्लः**
शोधच्छात्रः, साहित्यविभागः,
गंगानाथझापरिसरः, प्रयागराजः

# परिहासविजल्पिते हास्यरसविवेचनम्

**अनिलकुमारशुक्लः**

**प्रस्तावना -** संस्कृतकाव्यशास्त्रे रसशब्दस्य प्रयोगो विविधेष्वर्थेष्वभूत्। कोशग्रन्थेषु रसशब्दस्याने-केऽर्थाः सन्ति यथा - स्वादः, जलम्, वीर्यम्, शृङ्गारादयश्च काव्यरसाः, विषम्, द्रवः, पारदः, रागः, तिक्तादयश्च भोज्यरसाः। उपनिषत्सु परमात्मनः कृतेऽपि रसपदस्य व्यवहारोऽभूत्। यथा तैत्तिरीयोपनिषदि 'परमात्मा रसशब्देनाभिधीयते। यतः तत्प्राप्त्यनन्तरमेवानन्दानुभूतिर्जायते। वैदिकसाहित्ये शृङ्गारादिसाहित्यिकरसानां कृतेऽपि रसशब्दस्य प्रयोगो वर्तते। आचार्यभरतेन वेदेभ्यो रसस्य ग्रहणं कृतमस्ति । यथा -

**'जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानथर्वणादपि ॥'**[1]

**रसशब्दस्य व्युत्पत्तिः -** व्याकरणशास्त्रानुसारं रस शब्दस्य व्युत्पत्तिश्चतुर्धा यथा -

**'रस्यते आस्वद्यते इति रसः'** व्युत्पत्यानुसारेण आस्वाद्यमानाः सोमगन्धमध्वादयः पदार्थाः रसशबदेन कथयितुं शक्यन्ते ।

**'रस्यते अनेन इति रसः; एषां पदार्थानामास्वादनं क्रियते ते रसाः कथ्यन्ते** । एवं राग-वीर्य-शरीरादिकञ्च रसः कथ्यते ।

**'रसति रसयति वा रसः'** यो व्याप्यते व्याप्नोति वा स रस इति कथ्यते ।

**'रसनं रसः आस्वादः'** यः आस्वादः स रस उच्यते । एतदनुगुसारेण श्रृंगारादयो रसाः कथ्यन्ते ।

काव्यानां रसात्मकतां प्रतिपादयितुं वाल्मीकिरामायणस्य दृष्टान्त प्रस्तुयते यदा महर्षिः वाल्मीकिः स्नानार्थं तमसां नदीं जगाम्, तदा मार्गे तेनावलोकितं यत् केनचित् व्याधेन कामपीडित क्रौञ्च युग्लात् एकतर क्रौञ्चः वाणेन व्यापाद्य भूमौ पातितः । क्रौञ्चपत्न्या अत्यधिकः विलापः विहितः । तस्याः कारुणिकं विलापमाकर्ण्य वाल्मीकिः करुनार्द्रचेतोऽभूत् । महर्षेः वाल्मीकेः स शोक एव श्लोकरुपे परिणतो बभुव ।[2] धवन्यालोककारेण आनन्दवर्धनाचार्येण तत्र पद्यमिदं काव्यात्मत्वेनोररीकृतम् ।[3]

महाकविवाल्मीकिप्रणीतं रामायणमादिकाव्यमास्ते। यद्यपि काव्यमिदं करुणरससिक्तम् तथापि महाकव्येऽस्मिन् श्रृगार-हास्य-करुण-रौद्र-वीर-भयानक- अद्भुत-बीभत्सशान्तादीनां समेषां रसानां सन्निवेशोऽस्ति ।[4]

**रसस्य लक्षणम् -** भारतीयकाव्यशास्त्रेतिहासे सर्वप्रथमं नाट्यशास्त्रकारेणाचार्यभरतेन रसस्वरूपस्य, तस्यानुभूतेश्च वर्णनं कृतमासीत् । ततः भरतादुत्तरवर्तिभिराचार्यैः रसविषये यद् विवेचितं तत्सर्वं भरतरससूत्रमाधारीकृत्यैव प्रस्तुतमस्ति- **'विभानुभावव्यभिचारिसंयोगाद्रसनिष्पतिः'**[5] अर्थात् विभावानु-भावव्यभिचारि संयोगात् रसस्य निष्पत्तिः उत्पतिर्भवति। सूत्रस्यास्य व्याख्यां कुर्वता भरतेन प्रतिपादितं यत् यथा संस्कृतमन्नं भुञ्जानः रसानास्वादयन्ति सुमनसः पुरुषाः हर्षादींश्चाधिगच्छन्ति, तथा -

नानाभावाभिनयव्यञ्जतान् वागङ्गसत्वोपेतान् स्थायिभावना आस्वादयन्ति सुमनसः प्रेक्षकाः हर्षादींश्चाधिगच्छन्ति । अपि च यथा गुडादि द्रव्येभ्यः व्यञ्जनेभ्यः औषधीभ्यः षड्रसाः उत्पद्यन्ते, तथैव विविध भावैर्युक्तो भूत्वा रसरूपतां प्राप्नोति ।[6] रसनिष्पत्तिसम्बन्धे अन्यैः सवैराचार्यैः भारताभिमतरससूत्रस्यैवानुकरणं कृतमस्ति । उक्तं च मम्मटेन -

**कारणान्यथ कार्यणि सहकारीणि यानि च ।**
**रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्यकाव्ययोः ॥**
**विभावा अनिभावास्तत् कथ्यन्ते व्यभिचारिणः ।**
**व्यक्तः स तैर्विभावाद्यैः स्थायीभावो रसः स्मृतः ॥**[7]

यस्मिन् हितस्य भावो निहितो भवति तत् साहित्यमुच्यते ।[8] साहित्यं समाजस्य दर्पणं स्वीक्रियते। समाजे यत्किञ्चिद्वर्त्तनं यस्मिन् रूपे भवति तत्सर्वं तस्मिन्नेव रूपे लक्षितो भवेदिति साहित्यस्वरूपम् ।

**परिहासविजल्पिते हास्यरसः -** परिहासविजल्पिते वसन्ततिलका-छन्दसि जीवने हास्यमहिमाया मण्डनं कृतम् । तत्रोक्तं यद्यो जनो जीवने हास्यरसं न जानाति तस्य जीवनं निरर्थमिव प्रतीयते । एतद्विपरीतं यो जनो जीवने हास्यलाभं गृह्णाति स सर्वदा मानसिकशारीरि दृष्ट्याः पुष्टो भवति । तत्राह -

**जानाति यो न हसनं व्यसनं विहाय,**
**तस्याऽस्ति जीवनमिदं नितरां निरर्थम्।**
**पश्यन्तु भो! जगति मानव एव हृष्टः,**
**यः केवलं प्रतिपलं हसितुं समर्थः।।**[9]

यदा वार्तालापे यज्ञदत्तस्य प्रश्नं श्रुत्वा उत्तरं ददन् देवदत्तो वदति यत् हे मित्र! अयम् प्रश्नः मम कृतेऽतीवमहत्त्वपूर्णः प्रतीयते। अतः अहम् अत्र अस्य प्रश्नस्य उत्तरं ददामि, भवान् कृपया ध्यानेन शृणोतु।

हे भ्रातः! पत्न्याः प्रथमम् आयुधं तु तस्याः अश्रूणि एव सन्ति। यतो हि एतेषाम् अश्रूणां प्रभावेण पुरुषाः निश्चितरूपेण पराजिताः भवन्ति। प्रतिवेशिन्याः मन्दं मधुरं च हास्यं तस्याः द्वितीयम् आयुधं मन्यते। अनेन आयुधेनापि पुरुषाणां निश्चितः पराजयः भवति -

**सखे ! महत्त्वपूर्णोऽयम् प्रश्नस्ते प्रतिभाति मे।**
**उत्तरं प्रददाम्यत्र ध्यानतः कृपया शृणु।।**
**प्रथमस्त्वायुधस्तावत् पत्न्याः अश्रूणि सन्ति भो !।**
**पुरुषा यत्प्रभावेण ध्रुवं सन्ति पराजिताः ।।**
**द्वितीयः प्रतिवेशिन्याः मन्दं सुस्मितयः स्मृताः।**
**अनेनाऽप्यायुधेन स्यात् पुरुषाणां पराजयः।।**[10]

एकस्मिन् अन्ये 'किं न गच्छेत् निजाऽऽपणे' इति परिहासे वार्तालापप्रसङ्गे एकसस्मिन् दिने यज्ञदत्तः स्वसखायं देवदत्तम् एवं प्रश्नं पृच्छति यत्— कश्चित् खलतिः (केशरहितः) पुरुषः यदि प्रत्यहं केशानां कर्त्तनालये (नापितगृहे) गच्छति, तर्हि तत्र किं कारणं स्यात्? तस्य एतादृशं प्रश्नं श्रुत्वा देवदत्तः विकसिताननः सन् मन्दं मन्दं विहस्य यज्ञदत्तं कथयति यत्— त्वं पुनः किमिदं मूर्खतापूर्णं प्रश्नं पृच्छसि? सः खल्वाटः पुरुषः तत्र किमर्थं प्रतिदिनं गच्छति, तस्य कारणं शृणु। भो मित्र! सः खल्वाटः पुरुषः तस्यैव केशानां कर्त्तनालयस्य (हट्टस्य) स्वामी अस्ति। अतः सः प्रतिदिनं स्वस्य आपणे किमर्थं न गच्छेत्? अर्थात् सः धनार्जनाय स्वदुकानं गच्छति, न तु केशानां कर्त्तनाय इति । यथोक्तम् -

**वार्तालापप्रसङ्गे तु यज्ञदत्तस्त्वथैकदा।**
**सखायं देवदत्तं च प्रश्नमेवं करोति यत्।।**
**खल्वाटः पुरुषः कश्चित् केशानां कर्त्तनालये।**
**प्रत्यहं यदि गच्छेत् स तत्र किं कारणं भवेत् ? ।।**
**तस्य प्रश्नं समाकर्ण्य देवदत्तः स्मिताननः ।**
**मन्दं मन्दं विहस्याऽथ यज्ञदत्तं ब्रवीति यत्।।**
**किमेतत् मूर्खतापूर्ण प्रश्नं त्वं कुरुषे पुनः।**
**खल्वाटः प्रत्यहं गच्छेत् तत्र तत्कारणं शृणु।।**
**पुरुषः सैव खल्वाटः स्वामी स्यादापणस्य भो !।**
**तस्मात् प्रत्यहमेवाऽसौ किं न गच्छेत् निजापणे?**[11]

एकस्मिन् अन्ये 'को दण्डः स्यादितोऽधिकः' इति परिहासे वार्तालापप्रसङ्गे कलहे प्रवर्त्तमाने सत्यतीवक्रोधयुक्तः देवदत्तः स्वकीयां भार्याम् एवं कथयति यत् अहो! त्वया सह विवाहकरणेन मम जीवने एकः महान् लाभः अभवत्, किं त्वं तत् ज्ञातुम् इच्छसि? पत्युः एतादृशं वचनं श्रुत्वा तस्य भार्या विस्मिता सती अपृच्छत् यत् तव जीवने कः लाभः अस्ति? तदा देवदत्तः क्षणमात्रं मौनं धृत्वा, किञ्चित् विचिन्त्य, शनैः शनैः तत्र एवम् अवदत् यत् मनुष्याणां सर्वेषाम् अपराधानां दण्डः प्रायः जन्मान्तरे प्राप्यते, परन्तु तव कारणेन सः सर्वोऽपि दण्डः मया अस्मिन्नेव जन्मनि प्राप्तः अस्ति। यथाह -

**कलहे प्रवर्त्तमाने तु बहुरोष-समन्वितः।**
**देवदत्तो निजां भार्यां वाक्यमेवं ब्रवीति यत्।।**
**त्वया सह विवाहस्य लाभ एको महान् अहो !।**
**जीवने विद्यते मे तु किं त्वं तज्ज्ञातुमिच्छसि ? ।।**
**पत्युस्तद् वचनं श्रुत्वा तद्भार्या विस्मयाऽन्विता ।**
**पप्रच्छ यत् कथं लाभो विद्यते तव जीवने ? ।।**
**देवदत्तस्तदा किञ्चित् मौनमाधाय चिन्तयन्।**
**शनैःशनैस्तदा तत्र वाक्यमेवं ब्रवीति यत्।।**
**सर्वेषाम् अपराधानां दण्डो जन्माऽन्तरेऽपि यत्।**
**तत्सर्वं हि मया प्राप्तम् अस्मिन्नेव हि जन्मनि ।।**[12]

भवतामेव सा सुता इत्यस्मिन् वार्तालापे हास्यरसो वर्णितस्तत्र यत् एकदा देवदत्तः विनयेन अवनतः भूत्वा स्वकीयम् कार्यालयाध्यक्षम्

अवदत् यत्— "हे स्वामिन्! अहम् इदानीं कार्यालयं आगन्तुं न शक्नोमि, अतः मह्यं दशदिनानां अवकाशः प्रदीयताम्।" तस्य एतत् वचनं श्रुत्वा कार्यालयस्य अध्यक्षः सहसा आश्चर्यचकितः अभवत्। सः देवदत्तं अपृच्छत् यत् "तव तादृशं किं महत् कार्यं वर्तते?" अध्यक्षस्य तं प्रश्नं श्रुत्वा देवदत्तः प्रत्यवदत् यत् मम विवाहः अस्ति, अतः विवाहाद् हेतोः मह्यम् अवकाशः आवश्यकः अस्ति। देवदत्तस्य उत्तरं श्रुत्वा नियोक्ता पुनः अवदत् यत् "का सा मूर्खा कन्या या त्वया सह विवाहं कर्तुं तत्परा अस्ति?" अध्यक्षेण एवं पृष्टे सति देवदत्तः शिरः नम्रीकृत्य मन्दं हसन् अवदत् यत् "श्रीमन्! सा अन्या कापि न, अपितु भवतः एव पुत्री अस्ति, या मया सह विवाहात् सज्जा अस्ति।" तत्राह-

**एकदा देवदत्तस्तु विनयाऽवनतो यदा।**
**स्वीयं कार्यालयाऽध्यक्षम् एवं वचनमाह यत्।।**
**अहं कार्यालये स्वामिन् ! आगन्तुं नैव पारये।**
**ततो दश दिनार्थं मे त्ववकाशः प्रदीयताम् ।।**
**तस्य तद्वचनं श्रुत्वा सहसा विस्मयाऽन्वितः ।**
**प्राह कार्यालयाऽध्यक्षः किं कार्यं वर्तते तथा?।।**
**तस्य तत्प्रश्नमाकर्ण्य देवदत्तो ब्रवीति यत्।**
**विवाहस्य कृते मह्यम् अवकाशस्त्वपेक्षितः ।।**
**तस्य वाक्यं समाकर्ण्य पुनरूचे नियोजकः।**
**का मूर्खा या त्वया सार्धं विवाहं कर्तुमुद्यता ? ।।**
**देवदत्तस्तथा पृष्टे शिरो नत्वा ब्रवीति यत् ।**
**भवतामेव पुत्री सा विवाहाऽर्थं समुद्यता ।।**[13]

**उपसंहारः-** परिहासविजल्पितस्य ग्रन्थस्याध्ययनेन नैकानां हासपरिहासव्यङ्ग्यभावैः समाजिकपरिवेशस्य ज्ञानं सम्भवति। आध्यात्मिकादिभिस्त्रिभिर्दुखैर्ग्रसिते मानवजीवने हास्यरसेन कथमे-तेषां त्रिविध-दुःखानां शमो भवेदिति कवेः प्रयासस्तु श्लाघनीय एव। ग्रन्थस्य मुख्यमुद्देश्यं हास्यरसेन सामाजिकविचाराणामुद्भावनमथ च समाजिकसमस्यानां निवारणमित्यस्ति ।

**सन्दर्भ ग्रन्थसूची -**

1. नाट्यशास्त्रम्,
2. वाल्मीकिरामायणम्,
3. ध्वन्यालोकः
4. काव्यप्रकाशः,
5. परिहासविजल्पितम्

**पाद टिप्पणी**

[1]भरतनाट्यशास्त्रम्, 1.17

[2]मा निषाद प्रतिष्ठां त्वमगमः शाश्वती समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ वाल्मीकिरामायणम्, 1.2.15

[3]काव्यस्यात्मा स एवार्थस्तथा चादि कवेः पुरा ।
क्रौञ्चद्वन्द वियोगोत्थः शोकः श्लोकत्वमागत॥ ध्वन्यालोकः, 1.5

[4]'शोकार्तस्य प्रवृतो मे श्लोकः भवतु नान्यथा' वाल्मीकिरामायणम्, 1.2.40

[5]नाट्यशास्त्रम्, पृ. 228

[6]'यथा नाना व्यञ्जवौषधि द्रव्य संयोगाद्रसनिष्पत्तिस्तथा नाना भावोपगमाद्रस निष्पत्तिः । यथा गुडादिभिर्द्रव्यैर्व्यञ्जनौषधिभिश्च पारदादयो रसाः निवर्त्यन्ते तथा नानाभावोपगता अपि स्थायिनो भावाः रसत्वमाप्नुवन्ति' । नाट्यशास्त्रम्, 6.2

[7]काव्यप्रकाशः, 4.27-28

[8]सहितस्य भावः साहित्यम् । काव्यप्रकाशः, भूमिकायाम्, पृष्ठः 2

[9]परिहासविजल्पितम्, मङ्गलपद्यम् - 2

[10]परिहासविजल्पितम्, प्रथमं प्रकरणम्, सहृत्परिहासः, आयुधौ कौ भयप्रदौ, श्लोकः 3-5, पृष्ठः - 30

[11]परिहासविजल्पितम्, द्वितीयं प्रकरणम्, आपणरिहासः, किं न गच्छेत् निजाऽऽपणे ? श्लोकः 1-5, पृष्ठः – 66-67

[12]परिहासविजल्पितम्, पञ्चमं प्रकरणम्, दाम्पत्यपरिहासाः, को दण्डः स्यादितोऽधिकः? श्लोकः 1-5, पृष्ठः - 148-149

[13]परिहासविजल्पितम्, चतुर्थं प्रकरणम्, वैवाहिकपरिहासाः, भवतामेव सा सुता, श्लोकः 1-6, पृष्ठः - 88-89